शङ्खनेत्रमिदं सर्व्वदेवानामपि दुर्लभम् ॥४॥
डमरुप्रतिमं नेत्रं यस्य भूमौ प्रतीयते ।
सर्व्वार्थसाधकं खड्गं तं विद्याद्विजयप्रदम् ॥५॥
धनुःस्वरूपं यन्नेत्रं धनुर्नेत्रमुषन्ति तम् ।
तस्य स्पर्शनमात्रेण मन्दोऽपि प्रसुखायते ॥
अयं निशीथे विजने खड्गो झनझनायते ॥६॥
यन्नेत्रमङ्कुशाकारं तंविद्याद्गुणवत्तरम् ॥
खड्गमङ्कुशनेत्राख्यं भर्त्तुः सर्व्वार्थसाधकम् ।
अलक्ष्मीपापरक्षोघ्नं कृत्याग्रहनिवारणम् ॥७॥
छत्राकारं यदा नेत्रं छत्रनेत्रं वदन्ति तम् ।
अस्य प्रभावात् क्षीणोऽपि सार्व्वभौमो भवेन्नृपः ।
दीनोऽपि च सुखी भूयात् सुखी भूयान्महेश्वरः ।
महेश्वरोऽपि सचिवः सचिवो मण्डलेश्वरः ॥
मण्डलेशश्चक्रवर्त्ती भवेदत्र न संशयः ॥८॥
पताकाकृतिनेत्रञ्चेत् सर्व्वसम्पत्तिकारकम् ॥
पताकानेत्रमाहुस्तं संग्रामे विजयप्रदम् ॥९॥
नेत्रं वीणाकृति यदा वीणानेत्रमुषन्ति तम् ।
निशीथे विजने खड्गो वीणावत् स्वनमावहेत् ।
अस्य प्रभावात् सर्व्वेशा अपि वशा भवन्ति हि ॥१०॥
मत्स्याकृति यदा नेत्रं मत्स्यनेत्रमिमं विदुः ।
अस्य प्रभावात् क्षितिपः कृत्स्नां साधयते महीम् ॥११॥
शिवलिङ्गसमं नेत्रं लिङ्गनेत्रमिमं विदुः ।
भर्त्तुः सर्व्वार्थसंसिद्ध्यै शत्रूणां नाशनाय च ॥
वामपार्श्वे तु यात्रायां धर्त्तव्योऽयं तथा रणे १२।
अत्र ध्वजार्द्धचन्द्रकलसानां लक्षणानि पतितानि । १३ । १४ । १५ ।
शूलाकृति यदा नेत्रं शूलनेत्रं वदन्ति तम् ।
सर्व्वार्थसाधकः सर्व्वारिष्टानिष्टप्रणाशनः ॥१६॥
शार्द्दूलनेत्रं तं विद्यात् शार्द्दूलाकृतिनेत्रतः ।
शत्रुश्रेणीविनाशाय संग्रामे विजयाय च ॥१७॥
सिंहाकृति यदा नेत्रं सिंहनेत्रमिमं विदुः ।
अस्य प्रभावात् क्षीणोऽपि कृत्स्नां साधयते महीम् ॥१८॥
तत् सिंहासननेत्रं स्यात् नेत्रे सिंहासनोपमे ।
अस्य प्रभावात् क्षितिपः कृत्स्नां साधयते महीम् ॥१९॥
गजाकृति यदा नेत्रं गजनेत्रं वदन्ति तम् ॥
अस्य प्रभावात् क्षीणोऽपि लभते राजसम्पदम् ॥ २० ॥
नेत्रं हंसाकृति यदा हंसनेत्रं वदन्ति तम् ।
अस्य प्रभावात् भूपालो यशः प्राप्नोत्यनुत्तमम् ॥ २१ ॥
मयूराकृतिनेत्रं द तन्नेत्रमिति निर्द्दिशेत् ॥
अस्य प्रभावान्मनुजः सर्पदर्पांश्चिरुद्दयेत् ॥२२॥
जिह्वाकारं यदा नेत्रं जिह्वानेत्रं वदन्ति च ॥
संग्रामखर्परेष्वेवं पिबेद्वैरिशिरोरजः ॥२३॥
दन्ताकारं यदा नेत्रं दन्तनेत्रं वदन्ति तम ॥
अयं रिपुगणं मङ्क्षु चर्व्वयत्यतिभैरवम् ॥२४॥
खड्गाकारं यदा नेत्रं खड्गनेत्रं वदन्ति तम् ।
तस्य प्रभावान्मनुजस्त्रिलोकीं वशयेदपि ॥२५॥
मनुष्यपुत्त्रिकाकारा पुत्त्रिकानेत्रमुच्यते ॥
अयं सशैलां सद्वीपां कृत्स्नां साधयेत् क्षितिम् ।
न चेयं पुत्त्रिका किन्तु जयलक्ष्मीरिह स्वयम् ॥
तस्मान्नायं मनुष्याणामल्पभाग्येन लभ्यते ॥२६॥
चामराकृतिनेत्रत्वात्तन्नेत्रमिति निर्द्दिशेत् ।
अस्य प्रभावाज्जायन्ते चामरोद्धृतसम्पदः ॥२७॥
एकानेकशिखे शैलनेत्रे तन्नेत्रसंज्ञकम् ।
अपि राष्ट्रभये युद्धे विषमे वैरिसंकटे ।
स्थिरीकरोति धरणीं धरणीं पर्व्वतो यथा ॥२८॥
पुष्पमालासमं नेत्रं पुष्पनेत्रं वदन्ति तम् ।
अस्य प्रभावात्तुष्यन्ति ग्रहाः सर्व्वाश्च देवताः ॥ २९ ॥
भुजङ्गमसमे नेत्रे सर्पनेत्रमिदं मतम् ।
अयं शत्रुगणं हन्ति यथा मर्त्त्यं भुजङ्गमः ॥३०॥
सवर्णं समवर्णञ्च तत् सर्व्वं द्विविधं भवेत् ।
सवर्णं शान्तिसम्पत्त्यै रिपुनाशे तथापरम् ॥
द्वयोरेकत्र पृष्ठे च तत् पुनर्विविधं भवेत् ।
एकलोकसुखं नेदं ददाति द्विविधं द्वयोः ॥
मूलमध्याग्रसंस्थानात्तत् पुनर्द्विविधं भवेत् ।
अग्रे चाग्रफलं ज्ञेयं मध्ये मध्यफलं मतम् ॥
मूले फलं जघन्यं स्यात् प्राह नागार्ज्जुनो मुनिः ।
एकं द्वे त्रीणि नेत्राणि नात्र संख्या व्यतिक्रमः ॥
एकं धर्म्मः स्वर्गकामौ द्वे त्रीणि च त्रिवर्गकम् ।
तत्फलानि प्रयच्छन्ति प्राह नागार्ज्जुनो मुनिः ॥
द्विनेत्रमिति जानीयात् स्वसंज्ञां नेत्रयोर्द्वयोः ।
त्रिनेत्रञ्च त्रिभिर्ज्ञेयं बहुनेत्रमतः परम् ॥
यथोत्तरं गुणवहं खड्गमाहुरनुत्तमम् ।
दिङ्मात्रमिति निर्द्दिष्टं नेत्राणां शुभदायिनाम् ॥
तीव्राणां मङ्गलानाञ्च दर्शनञ्च शुभावहम् ॥”
इति खड्गपरीक्षायां नेत्राध्यायः पञ्चमः ॥*॥
“यथा नेत्रस्य संस्थानं तथारिष्टस्य लक्षयेत् ।
नेत्रेषु स्थाननियमो नारिष्टे स्थाननिर्णयः ॥
प्रशस्ताङ्गोऽपि यः खड्गोऽरिष्टेनैकेन निन्दितः ॥”
अथ त्रिंशदरिष्टानां लक्षणानि ॥
“छिद्रवद्दृश्यते खड्गे स्वभावेन च लक्ष्यते ।
छिद्रारिष्टमिदं विद्धि भर्त्तुर्व्वीर्य्यबलापहम् ॥१॥
यदा काकपदाकारमरिष्टं दृश्यते क्वचित् ।
अयं काकपदारिष्टः सर्व्वाभीष्टविनाशनः ॥२॥
रेखाकारं यदारिष्टमूर्द्ध्वं वा तिर्य्यगेव वा ।
रेखारिष्टमिदं विद्धि भर्त्तुर्वीर्य्यबलापहम् ॥३॥
भिन्नभ्रान्तिकरं पापं भिन्नारिष्टमिदं विदुः ।
भर्त्तुः कुलं यशो राष्ट्रं नाहत्वा न शमेत् स्वयम् ॥४॥
यदा भेकशिरोरूपमरिष्टं दृश्यते क्वचित् ।
भेकारिष्टमिदं नाम्ना संग्रामे भयदायकम् ॥५ ॥
अरिष्टे मुषिकाकारे मुषिकारिष्टमुच्यते ।
अयं खड्गाधमः कुर्य्यात् प्रभुः पातालसङ्गमम् ॥६॥
विडालनयनाकारो बिन्दुरेकोऽतिविस्तरः ।
विडालारिष्टमेतत् स्यात् भर्त्तुः सर्व्वार्थनाशनम् ॥७॥
अरिष्टं शर्कराकारं यदा स्पर्शेन बुध्यते ।
शर्करारिष्टमेतत् स्याद्धनबुद्धिविनाशनम् ॥८॥
यदा नीलीरसाभासमरिष्टं दृश्यते क्वचित् ।
नील्यरिष्टमिदं ज्ञेयं यशोलक्ष्मीविनाशनम् ॥९॥
अरिष्टे मशकाकारे मशकारिष्टमुच्यते ।
भर्त्तुः कुलं यशो बुद्धिं धृतिं प्रीतिञ्च नाशयेत् ॥ १० ॥
भृङ्गमाप्रतिमो बिन्दुरेकोऽनेकोऽथवा यदा ।
भृङ्गमारिष्ट इत्येष धृतिस्फूर्तिविनाशनः ॥११॥
छच्चीरूपमरिष्टञ्चेदूर्द्ध्वं वा तिर्य्यगेव वा ।
छच्यरिष्टमिदं नाम भर्त्तुः कुलविनाशनम् ॥१२॥
चयश्चेद्बिन्दवो राजन् ! पङ्क्तयो विषमेण वा ।
उपर्य्युपरि वाधोऽधस्त्रिबिन्द्वाख्यमरिष्टकम् ॥
तस्य स्पर्शनमात्रेण सचेलः स्नानमाचरेत् ॥१३॥
कालिकारिष्टमित्येतद् धीधृतिस्फूर्त्तिविनाशनम् ॥ १४ ॥
एकत्र यदि न छेद प्रयत्नेनापि संहतः ।
दारी नाम महारिष्टं सर्व्वाभीष्टविनाशनम् ॥
अनेकगुणसम्पन्नः खड्गो लोकैर्न गृह्यते ॥१५॥
कपोतपक्षप्रतिममरिष्टञ्चेत्तदाह्वयम् ।
भर्त्तुः कुलं यशो विद्यां बलं बुद्धिञ्च नाशयेत् ॥१६॥
काकाकृति यदारिष्टं काकारिष्टं तदोच्यते ।
अनेन भर्त्तुः संग्रामे भङ्ग एवोपजायते ॥१७॥
अरिष्टे खर्पराकारे खर्परारिष्टमुच्यते ।
भर्त्तुर्यशो बलं वीर्य्यं बुद्धिं प्रीतिञ्च नाशयेत् ॥१८॥
यदान्यलोहशकलं लग्नं स्यादिव लक्ष्यते ।
शकलीति स वै खड्गः सर्व्वाभीष्टनिसूदनः ॥१९॥
क्रोडीकुशपत्रकयोर्लक्षणे पतिते २० । २१ ।
यस्मिन्निम्नमिवाभाति मध्ये वा दृश्यते क्वचित् ।
जालारिष्टमिदं नाम भर्त्तुः कुलधनापहम् ॥२२॥
एकैकरेखा दीर्घाग्रा यदा पक्षविनी भवेत् ।
सर्प्पे वाथ करेणाथ करालारिष्टमुच्यते ॥
अयं हि क्षितिपालानां दृष्टियोग्यो भवेन्न हि ।
दर्शनादेव नश्यन्ति यशोलक्ष्मीजयादयः ॥२३॥
अरिष्टे कङ्कपत्राभे कङ्कारिष्टं तदुच्यते ।
अस्य स्पर्शनमात्रेण नश्यत्यायुर्यशो बलम् ॥२४॥
खर्ज्जूरदलप्रतिमं यदारिष्टन्तु लक्ष्यते ।
खर्ज्जूरारिष्टमेतत् स्याद्भर्त्तुः कुलधनापहम् ॥२५॥
गोशृङ्गाभमरिष्टञ्चेत् शृङ्गारिष्टं तदुच्यते ।
अनेन भर्त्तुर्नश्यन्ति लक्ष्मीबलकुलादयः ॥२६॥
गोपुच्छाकृति चेत् खड्गे अरिष्टं संप्रतीयते ।
पुच्छारिष्टमिदं नाम भर्त्तुः सर्व्वार्थनाशनम् ॥२७॥
खनित्राभमरिष्टञ्चेत् खनित्रारिष्टमुच्यते ।
शूराणामपि संग्रामे भङ्गमेतत् प्रयच्छति ॥२८॥
अरिष्टे लाङ्गलाकारे लाङ्गलारिष्टमुच्यते ।
अयं पापात् पापतरः प्रेक्षणीयो न भूभुजा ॥
अयमायुः श्रियं हन्ति विद्यां बलमपीश्वरः ॥२९॥
वडिशारिष्टस्य लक्षणं पतितम् ॥३०॥
इत्यरिष्टानि प्रोक्तानि नानात्मात् प्रयत्नतः ।
विचार्य्यैतानि मतिमान् खड्गं कोषे निधापयेत् ॥
दिङ्मात्रमिदमुद्दिष्टमरिष्टानां हितात्मनाम् ।
अमङ्गलानां मन्दानां दर्शनञ्चाशुभावहम् ॥